# AMRITA VIDYALAYAM
## ANNUAL EXAMINATION 2019 - 20

**Class : IX** | **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
खण्डः क - अपठित अवबोधनम् - 10
खण्डः ख - रचनात्मक कार्यम् - 15
खण्डः ग - अनुप्रयुक्त व्याकरणम् - 25
खण्डः घ - पठित अवबोधनम् - 30

## खण्डः क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

ह्यः रविवासरः आसीत्। अस्मात् कारणात् विद्यालयेषु कार्यालयेषु च अवकाशः आसीत्। ह्यः चित्रसेनः परिवारेण सह वनभोजनाय यमुना कुञ्जम् अगच्छत्। यमुना कुञ्जम् विशालम् उपवनम् अस्ति। उपवनस्य परिसरे एकः जलाशयः अस्ति। जलाशयस्य जले सुरम्या वर्तकाः तरन्ति। जलाशयं परितः स्थिताः बालकाः वर्तकान् पश्यन्ति प्रसन्नाः च भवन्ति। उपवने अनेके जनाः भ्रमणाय आगच्छन्ति, उपवनस्य च शोभां दृष्ट्वा हृष्यन्ति। भ्रमणेन ज्ञानं वर्धयति। परस्परसहयोगस्य भावना अपि उत्पन्नं भवति। नयनस्नेहेन एव परस्परं व्यवहारं कुर्मः। अनेन अनेके उत्तमगुणाः अपि जनेषु वर्धयन्ति। अतः भ्रमणं अस्माकं जीवनस्य प्रधानम् अंगम् अस्ति।

**I. एकपदेन उत्तरयत।** **2**

क. ह्यः कः वासरः आसीत्?
ख. यमुना कुञ्जम् कीदृशम् उपवनम् अस्ति?

**II. पूर्णवाक्येन उत्तरयत।** **4**

क. बालकाः कथं प्रसन्नाः भवन्ति?
ख. भ्रमणेन किं किं भवति?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**IV. भाषिककार्यम्।** **3**

क. 'अगच्छत्' इति क्रिया पदस्य कर्तृपदं किम्?
ख. 'उद्यानम्' इति पदस्य पर्यायः गद्यांशं किं प्रयुक्तम्?

ग. 'जलाशयः' इति विशेष्यपदस्य विशेषणपदं किम्?

## खण्डः ख – रचनात्मकं कार्यम्

**2. अनुपस्थितिवशात् क्षमायाचनापत्रं मञ्जूषायां लिखितैः उचितपदैः पूरयत।** 5

मञ्जूषा

(अहं, प्रार्थना, अतुलः, अनादाय, प्रधानाध्यापकमहोदयः प्रथमः अवसरः, जयपुरम्, विद्यालयात्, अस्मि, क्षम्यताम्)

सेवायां

श्रीमन्तः क. ----------

नलन्दा विद्यालयः

ख. -----------

मान्यवर,

अहं ह्यः किञ्चित् अनिवार्यकार्यवशात् ग. ------ अवकाशम् घ. ------- अनुपस्थित तेन ङ. ----- पञ्चाशत् रूप्यकाणां शुल्कदण्डेन दण्डितः च. ------। अयं मम छ. -------- अतः भवता ज. -------- इति मे झ. --------।

भवदीयः

ञ. ----------

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत।** 5

मञ्जूषा

(हसन्ति, बालिकाः, पश्यति, नौकायाः नदी, संरक्षणार्थम्, स्फोरकपत्रे, चित्रं, समाचारपत्राणि)



अथवा

**मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत।**

"परोपकारम्"

मञ्जूषा

(परोपकार:, कुर्वन्ति, पुण्याय, सफलतां सज्जना:, वृक्षा:, फलन्ति, सुखस्य, पापाय)

**4. अधोलिखित वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं प्रश्नपञ्चकम्)** **5**

क. He will give money to the poor.

ख. They should learn the lesson.

ग. Both of you drink water.

घ. This is a book.

ङ. The father brings pen for his son.

च. The student bows to the teacher.

छ. The Ramayana is my favourite book.

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**5. अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिं सन्धिविच्छेदं वा लिखत।** **4**

क. अहं वनोत्सवं द्रष्टुं गच्छामि।

ख. बालस्तत्र अस्ति।

ग. बाल: तच्चित्रं पश्यति।

घ. विवेक: अद्य + एव उद्यानं गमिष्यति।

**6. उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत।** **4**

क. अनेके विद्वांस: --------- प्रवचनं कुर्वन्ति।

(सभाया:, सभां, सभायां, सभा)

ख. प्राचार्येण ------- बालकेभ्य: उपहारा: दीयन्ते।

(गच्छद्भ्य:, गच्छेभ्य:, गच्छतिभ्य:, गच्छतेभ्य:)

ग. --------- किं रोचते?

(त्वत्, त्वचि, तुभ्यम्, तव)

घ. गंगा -------- आत्मन: उद्धारं न भवति।

(स्नानं, स्नानेन, स्नानात्, स्नानस्य )

**7. अधोलिखित वाक्येषु कोष्ठके प्रदत्तधातूनां क्रियापदानां समुचितपदं किं भविष्यति?** **4**

क. यूयं श्व: काशीं ----------।

(गच्छति, गमिष्यति, गमिष्यामि, गमिष्यथ)

ख. अहं पितरं ----------।

(नमति, नमन्ति, नमसि, नमामि)

ग. शिष्याः गुरून् -----------।
(सेवते, सेवसे, सेवन्ते, सेवे)

घ. राधा ह्यः पितुः गृहम् -----------।
(अगच्छम्, अगच्छत्, अगच्छाव, अगच्छत)

**8. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।** **4**

क. ---------- अभितः जलम् अस्ति।
(मार्गस्य, मार्गेण, मार्गम्, मार्गः)

ख. --------- बहिः मा गच्छ।
(गृहम्, गृहात्, गृहस्य, गृहे)

ग. छात्रः --------- प्रवीणः अस्ति।
(भाषणम्, भाषणे, भाषणात्, भाषणस्य)

घ. --------- अधः सर्पः अस्ति।
(वृक्षं, वृक्षे, वृक्षस्य, वृक्षात्)

**9. रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य वा विभज्य वा लिखत।** **4**

क. छात्रेण रामायणं श्रु + क्त्वा कथितः।
(श्रूतवा, श्रुत्वा, श्रूत्वा, श्रुतवा)

ख. वानरः वृक्षम् आ + रुह् + ल्यप् कूर्दते।
(आरूह्य, आरुह्य, आरूहय, आरुहय)

ग. सः तत्र किं कर्तुम् गच्छति?
(कृ + तुम्, कृ + तुमुन, कृ + तुमन्, कृ + तव्यत्)

घ. अमृतः गृहं गम् + शतृ परिसरं पश्यति।
(गच्छन्तम्, गच्छता, गतवान्, गच्छन्)

**10. गद्धसंख्यानां स्थाने संस्कृतपदैः पूरयत।** **3**

क. वृक्षस्य शाखायां --------- खगाः अतिष्ठन्। (4)

ख. --------- ग्रामे एका वृद्धा वसति स्म। (1)

ग. --------- नक्षत्राणि भवन्ति। (27)

**11. निम्नलिखित पदेषु प्रयुक्तान् उपसर्गान् लिखत।** **2**

क. प्रयत्नः ख. पराजयते ग. अपहरित घ. संहार

## खण्डः घ – पठित अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

तदा खिन्नोबालकः एते पक्षिणो मानुषेषु नोपगच्छन्ति। तदन्वेषयाम्यपरं मानुषोचितं विनोदयितारमिति परिक्रम्य पलायमानं कमपि श्वानमवलोकयत्। प्रीतो बालस्तमित्थं संबोधयामास – रे मानुषाणां मित्र! पर्यटसि अस्मिन् निदाघदिवसे? आश्रयस्वेदं प्रच्छायशीतलं तरुमूलम् अहमपि क्रीडासहायं त्वामेवानुरूपं पश्यामीति। कुक्कुरः प्रत्याह –

यो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य।
रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि। इति।

**I. एकपदेन उत्तरयत।** **1**

क. बालकः कीदृशं श्वानमवलोकयत्?

ख. स्वामिनः गृहस्य रक्षां कः करोति?

**II. पूर्णवाक्येन उत्तरयत।** **1**

प्रीताः बालः श्वानम् प्रति किं उक्तवान्?

**III. भाषिककार्यम्।** **3**

क. कुक्कुरम् इति पदस्य पर्यायपदं किं प्रयुक्तम्?

ख. खिन्नः बालकः अनयोः पदयोः विशेषण पदं किम्?

ग. मित्र! पर्यटसि अस्मिन् निदाघदिवसे? अत्र क्रियापदं किम्?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥

**I. एकपदेन उत्तरयत।** **1**

क. केषां मैत्री छायैव वर्तते?

ख. दिनस्य पूर्वार्द्धे का गुर्वी भवति?

**II. पूर्णवाक्येन उत्तरयत।** **1**

केषां मैत्री दिनस्य पूर्वार्द्धे छायेव आरम्भगुर्वी क्षयिणी भवति?

**III. भाषिककार्यम्।** **3**

क. पुरा इति पदस्य पर्यायपदं किं प्रयुक्तम्?

ख. गुर्वी इति पदस्य विलोमपदं किं प्रयुक्तम्?

ग. छायेव इति पदस्य सन्धिविच्छेदं कुरुत।

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**

(ततः प्रविशति तपस्यारतः तपोदत्तः)

तपोदत्तः - अहमस्मि तपोदत्तः। बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि। तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्।
(ऊर्ध्वम् निश्वस्य)
हा विधे! किमिदम्मया कृतम्? कीदृशी दुर्बुद्धिरासीत्तदा। एतदपि न चिन्तितम्।

**I. एकपदेन उत्तरयत।** **1**

क. तपोदत्तः कदा विद्यां न अधीतवान्?

ख. कीदृशः तपोदत्तः प्रविशति?

**II. पूर्णवाक्येन उत्तरयत।** **1**

तपोदत्तः कैः गर्हितः अभवत्?

**III. भाषिककार्यम्।** **3**

क. निन्दितः इति पदस्य पर्यायपदं किं प्रयुक्तम्?

ख. नाट्यांशे अहम् इति पदं कस्मै प्रयुक्तम्?

ग. तपस्यारतः तपोदत्तः अत्र विशेषणपदं किम्?

**15. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

क. संपरिष्वज्य वैदेहीम् वामेनाङ्केन रावणः।

ख. वृक्षस्योपरि स्वर्णमयः प्रासादो वर्तते।

ग. इयं शारदायाः अवमानना अस्ति।

घ. मूषकैः तुला भक्षिता।

**16. मञ्जूषातः समुचितपदानि चित्वा निम्नलिखितपद्यद्वयस्य अन्वयं पूरयित्वा पुनः लिखत।** **4**

मञ्जूषा

(वैदेहीं, गात्रे, शब्दं, पतगसत्तमः, रावणं, अवसुप्तः व्रणान्, चरणाभ्यां)

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥

अन्वयः- महाबलः क. ------ तु तीक्ष्णनखाभ्यां ख. ------ तस्य ग. ------ बहुधा घ. --------- चकार।

तं शब्दमवसुप्तस्य जटायुरथ शुश्रुवे।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥

अन्वयः- अथ क. ------ जटायुः तं ख. ----- शुश्रुवे। क्षिप्रं ग. ------- निरीक्ष्य सः घ. ------- च ददर्श।

**17. अधोलिखितं कथांशं समुचितक्रमेण लिखत।** **4**

क. तस्य गुणैः प्रसन्नः राजा तं यौवराज्येऽभिषिक्तवान्।

ख. सः राजा कल्पतरुम् आराध्य जीमूतवाहनम् नाम पुत्रं प्राप्नोत्।

ग. जीमूतवाहनस्य यशः सर्वत्र प्रथितम्।

घ. सः पृथ्वीमदरिद्रां कर्तुम् कल्पवृक्षाय निवेदयति।

ङ. सः कल्पतरुः भुवि वसूनि अवर्षत्।

च. कञ्चनपुरनगरे जीमूतकेतुः नाम राजा वसति स्म।

छ. जीमूतवाहनः स्वमनोरथं साधयितुं कल्पवृक्षम् आराधयति।

ज. "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् कल्पवृक्षात् उदभूत्।

**18. अधोखितानां शब्दानां विलोम पदेन सह मेलनं कुरुत।** **3**

| | | |
|---|---|---|
| क. | योक्त्रयित्वा | बाणकोशः |
| ख. | अपवार्य | बद्ध्वा |
| ग. | तूणीर | दूरिकृत्य |